# tulasIkavacham 2

# तुलसीकवचम् २

## Document Information

Text title : tulasIkavacham 2

File name : tulasIkavacham2.itx

Category : kavacha, devii, tulasI, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# तुलसीकवचम् २

कवचं तव वक्ष्यामि भवसङ्कमनाशनम् ।
यस्य जापेन सिध्यन्ति सर्वार्था नातियत्नतः ॥ १॥

तुलसी पातु मे नित्यं शिरोवक्त्रोष्ठनासिकाः ।
श्रोत्रनेत्रललाटं च भ्रूकपोलं निरन्तरम् ॥ २॥

श्रीसखी पातु मे कण्ठं भुजौ वक्षश्च कक्षकम् ।
पृष्ठं च पिठरं सर्वं स्तनं जानू च हृत्तटम् ॥ ३॥

शुभा पातूदरं नाभिं पार्श्वं हस्ताङ्गुलिं तथा ।
जाठरं वह्निमखिलं गुदं जघनगुह्यकम् ॥ ४॥

पापहारिण्यवतु मे ऊरू स्फिङ्मांसजानुकम् ।
पुण्यदाऽवतु मे जङ्घे पादौ नारदसेविता ॥ ५॥

यदुक्तं यच्च नोक्तं मे यद्बाह्यं यत्तथान्तरम् ।
सर्वाङ्गं पातु मे देवी नारायणमनः प्रिया ॥ ६॥

इतीदं कवचं दिव्यं तुलस्याः सर्वसिद्धिकृत् ।
त्रिसन्ध्यं यो जपेत्तस्य श्रीर्विद्याऽऽयुश्च वर्धते ॥ ७॥

प्राचीः षड् विलिखेद्रेखाः उदीचीं पञ्च चैव हि ।
सङ्ख्यानां विंशतिस्तत्र कोष्ठानां तु भविष्यति ॥ ८॥

कोष्ठे कोष्ठे लिखेत्पादं मन्त्रस्यास्य यथाक्रमम् ।
भूर्जे रोचनया विद्वान् कोष्ठं कुङ्कुममिश्रया ॥ ९॥

यस्य यन्त्रमिदं मूर्ध्नि भुजे कण्ठेऽथवा भवेत् ।
सङ्ग्रामे व्यवहारे च चोरव्याघ्रभयेषु च ॥ १०॥

मारीभये वर्षभये निर्घात भयपीडिते ।
क्षयापस्मारपीडासु सर्पवृश्चिकलूल(त )के ॥ ११॥

तापज्वरेऽथवा शीते नेत्ररोगे च दुःसहे ।
न तस्य किञ्चिद् दुरितमिहामुत्र च जायते ॥ १२॥

वन्ध्या या धारयेद्यन्त्रं अचिरात्पुत्रिणी भवेत् ।
इतीदं कवचं प्रोक्तं वादे च विजयप्रदम् ॥ १३॥

गोमयेन मृदा चैव निर्माय प्रतिवादिनम् ।
लम्बमानां तस्य जिह्वां कृत्वा च निहया लिपेत् ॥ १४॥

वामपादेन चाक्रम्य तज्जिह्वां कवचं जपेत् ।
अचिरात्तस्य जिह्वायाः स्तम्भो भवति संसदि ॥ १५॥

वश्यमाकर्षणं चैव स्तम्भनोच्चाटने तथा ।
द्वेषणं मारणं चैव मन्त्रेणानेन विन्दति ॥ १६॥

विन्यस्तकवचो यस्तु मन्त्रराजेन मन्त्रितम् ।
भक्षयेत्तु त्वचं तस्य वाक्पतित्वं न संशयः ॥ १७॥

काम्यसिद्धिर्मयोक्ता ते मोक्षसिद्धिं निशामय ।
यो नवैस्तुलसीपत्रैः सालग्रामशिलार्चनम् ॥ १८॥

कुर्यात्पुरुषसूक्तेन तस्य मोक्षः करे स्थितः ।
वृद्धपाद्मतः

Encoded and proofread by Shree Devi Kumar

*tulasIkavacham 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*